# सुन्दरकाण्ड नवम सर्गः(९) - पुष्पक-वर्णनम्

तस्यालय वरिष्ठस्य मध्ये विपुल मायतम् ।
ददर्श भवन श्रेष्ठं हनुमान् मारुतात्मजः ॥ १ ॥

अर्धयोजन विस्तीर्ण मायतं योजनं हि तत् ।
भवनं राक्षसेन्द्रस्य बहु प्रासाद सङ्कुलम् ॥ २ ॥

मार्गमाणस्तु वैदेहीं सीता मायत लोचनाम् ।
सर्वतः परिचक्राम हनुमा नरिसूदनः ॥ ३ ॥

उत्तमं राक्षसावासं हनुमा नवलोकयन् ।
आससादाथ लक्ष्मीवान् राक्षसेन्द्र निवेशनम् ॥ ४ ॥

चतुर् विषाणैर् द्विरदैस् त्रिविषाणैस् तथैव च ।
परिक्षिप्त मसम्बाधं रक्ष्यमाण मुदायुधैः ॥ ५ ॥

राक्षसीभिश्च पत्नीभी रावणस्य निवेशनम् ।
आहृताभिश्च विक्रम्य राज कन्याभि रावृतम् ॥ ६ ॥

तन्नक्र मकरा कीर्णं तिमिङ्गिल झषाकुलम् ।
वायुवेग समाधूतं पन्नगै रिव सागरम् ॥ ७ ॥

या हि वैश्रवणे लक्ष्मीर्या चेन्द्रे हरिवाहने ।
सा रावण गृहे सर्वा नित्य मेवान पायिनी ॥ ८ ॥

या च राज्ञः कुबेरस्य यमस्य वरुणस्य च ।
तादृशी तद्विशिष्टा वा ऋद्धी रक्षो गृहेष्विह ॥ ९ ॥

तस्य हर्म्यस्य मध्यस्थं वेश्म चान्यत् सुनिर्मितम् ।
बहु निर्यूह सङ्कीर्णं ददर्श पवनात्मजः ॥ १० ॥

ब्रह्मणोऽर्थे कृतं दिव्यं दिवि यद् विश्वकर्मणा ।
विमानं पुष्पकं नाम सर्व रत्न विभूषितम् ॥ ११ ॥

परेण तपसा लेभे यत् कुबेरः पितामहात् ।
कुबेर मोजसा जित्वा लेभे तद्राक्षसेश्वरः ॥ १२ ॥

ईहा मृग समायुक्तैः कार्तस्वर हिरण्मयैः ।
सुकृतै राचितं स्तम्भैः प्रदीप्तमिव च श्रिया ॥ १३ ॥

मेरुमन्दर सङ्काशै रुल्लिखद्भि रिवाम्बरम् ।
कूटागारैः शुभाकारैः सर्वतः समलङ्कृतम् ॥ १४ ॥

ज्वलनार्क प्रतीकाशं सुकृतं विश्वकर्मणा ।
हेम सोपान सम्युक्तं चारु प्रवर वेदिकम् ॥ १५ ॥

जाल वातायनैर् युक्तं काञ्चनैः स्फाटिकैरपि ।
इन्द्रनील महानील मणिप्रवर वेदिकम् ॥ १६ ॥

विद्रुमेण विचित्रेण मणिभिश्च महाधनैः ।
निस्तुलाभिश्च मुक्ताभिस् तलेनाभि विराजितम् ॥ १७ ॥

चन्दनेन च रक्तेन तपनीय निभेन च ।
सुपुण्य गन्धिना युक्त मादित्य तरुणोपमम् ॥ १८ ॥

कूटागारैर् वराकारैर् विविधैः समलङ्कृतम् ।
विमानं पुष्पकं दिव्य मारुरोह महाकपिः ॥ १९ ॥

तत्रस्थः स तदा गन्धं पान भक्ष्यान्न सम्भवम् ।
दिव्यं सम्मूर्छितं जिघ्रद्रूपवन्त मिवानिलम् ॥ २० ॥

स गन्धस्तं महासत्त्वं बन्धुर् बन्धु मिवोत्तमम् ।
इत एहीत् युवाचेव तत्र यत्र स रावणः ॥ २१ ॥

ततस्तां प्रस्थितः शालां ददर्श महतीं शुभाम् ।
रावणस्य मनःकान्तां कान्तामिव वर स्त्रियम् ॥ २२ ॥

मणिसोपान विकृतां हेमजाल विभूषिताम् ।
स्फाटिकै रावृत तलां दन्तान्तरित रूपिकाम् ॥ २३ ॥

मुक्ताभिश्च प्रवालैश्च रूप्य चामीकरै रपि ।
विभूषितां मणि स्तम्भैः सुबहु स्तम्भ भूषिताम् ॥ २४ ॥

समैर् ऋजुभि रत्युच्चैः समन्तात् सुविभूषितैः ।
स्तम्भैः पक्षै रिवात्युच्चैर्दिवं सम्प्रस्थिता मिव ॥ २५ ॥

महत्या कुथयास् तीर्णां पृथिवी लक्षणाङ्कया ।
पृथिवीमिव विस्तीर्णां सराष्ट्र गृह मालिनीम् ॥ २६ ॥

नादितां मत्तविहगैर् दिव्य गन्धाधि वासिताम् ।
परार्ध्यास्तरणोपेतां रक्षोधिपनिषेविताम् ॥ २७ ॥

धूम्रा मगरु धूपेन विमलां हंस पाण्डुराम् ।
चित्रां पुष्पोपहारेण कल्माषी मिव सुप्रभाम् ॥ २८ ॥

मनःसंह्लाद जननीं वर्णस्यापि प्रसादिनीम् ।
तां शोक नाशिनीं दिव्यां श्रियः सञ्जननीमिव ॥ २९ ॥

इन्द्रिया णीन्द्रियार्थैस्तु पञ्च पञ्चभि रुत्तमैः ।
तर्पयामास मातेव तदा रावण पालिता ॥ ३० ॥

स्वर्गोऽयं देव लोकोऽय मिन्द्रस्येयं पुरी भवेत् ।
सिद्धिर्वेयं परा हि स्या दित्य मन्यत मारुतिः ॥ ३१ ॥

प्रध्यायत इवा पश्यत् प्रदीपांस् तत्र काञ्चनान् ।
धूर्तानिव महाधूर्तैर् देवनेन पराजितान् ॥ ३२ ॥

दीपानां च प्रकाशेन तेजसा रावणस्य च ।
अर्चिर्भिर् भूषणानां च प्रदीप्तेत् यभ्यमन्यत ॥ ३३ ॥

ततोऽपश्यत् कुथासीनं नानावर्णाम्बर स्त्रजम् ।
सहस्रं वरनारीणां नानावेष विभूषितम् ॥ ३४ ॥

परिवृत्तेऽर्धरात्रे तु पान निद्रावशं गतम् ।
क्रीडित् वोपरतं रात्रौ सुष्वाप बलवत् तदा ॥ ३५ ॥

तत्प्रसुप्तं विरुरुचे निःशब्दान्तर भूषणम् ।
निःशब्द हंस भ्रमरं यथा पद्मवनं महत् ॥ ३६ ॥

तासां संवृत दन्तानि मीलिताक्षाणि मारुतिः ।
अपश्यत् पद्म गन्धीनि वदनानि सुयोषिताम् ॥ ३७ ॥

प्रबुद्धानीव पद्मानि तासां भूत्वा क्षपाक्षये ।
पुनः संवृत पत्राणि रात्राविव बभुस् तदा ॥ ३८ ॥

इमानि मुख पद्मानि नियतं मत्त षट्पदाः ।
अम्बुजानीव फुल्लानि प्रार्थयन्ति पुनः पुनः ॥ ३९ ॥

इति चामन्यत श्रीमा नुपपत्त्या महाकपिः ।
मेने हि गुणतस्तानि समानि सलिलोद्भवैः ॥ ४० ॥

सा तस्य शुशुभे शाला ताभिः स्त्रीभिर् विराजिता ।
शारदीव प्रसन्ना द्यौस् ताराभि रभिशोभिता ॥ ४१ ॥

स च ताभिः परिवृतः शुशुभे राक्षसाधिपः ।
यथा ह्युडुपतिः श्रीमांस् ताराभिरभि संवृतः ॥ ४२ ॥

याश्च्यवन्तेऽम्बरात् ताराः पुण्यशेष समावृताः ।
इमास्ताः सङ्गताः कृत्स्ना इति मेने हरिस्तदा ॥ ४३ ॥

ताराणामिव सुव्यक्तं महतीनां शुभार्चिषाम् ।
प्रभा वर्ण प्रसादाश्च विरेजुस् तत्र योषिताम् ॥ ४४ ॥

व्यावृत्त गुरु पीनस्रक् प्रकीर्ण वर भूषणाः ।
पानव्याया मकालेषु निद्राप हृत चेतसः ॥ ४५ ॥

व्यावृत्त तिलकाः काश्चित् काश्चि दुद्भ्रान्त नूपुराः ।
पार्श्वे गलित हाराश्च काश्चित् परम योषितः ॥ ४६ ॥

मुक्ताहारा वृताश् चान्याः काश्चिद् विस्रस्त वाससः ।
व्याविद्ध रशना दामाः किशोर्य इव वाहिताः ॥ ४७ ॥

सुकुण्डल धराश्चान्या विच्छिन्न मृदितस्रजः ।
गजेन्द्र मृदिताः फुल्ला लता इव महावने ॥ ४८ ॥

चन्द्रांशु किरणाभाश्च हाराः कासाञ्चि दुत्कटाः ।
हंसा इव बभुः सुप्ताः स्तन मध्येषु योषिताम् ॥ ४९ ॥

अपरासां च वैडूर्याः कादम्बा इव पक्षिणः ।
हेम सूत्राणि चान्यासां चक्रवाका इवाभवन् ॥ ५० ॥

हंस कारण्डवा कीर्णाश् चक्रवाकोप शोभिताः ।
आपगा इव ता रेजुर्ज घनैः पुलिनैरिव ॥ ५१ ॥

किङ्किणी जाल सङ्कोशास् ता हैम विपुलाम्बुजाः ।
भावग्राहा यशस्तीराः सुप्ता नद्य इवाबभुः ॥ ५२ ॥

मृदुष्वङ्गेषु कासाञ्चित् कुचाग्रेषु च संस्थिताः ।
बभूवुर् भ्रमरानीव शुभा भूषण राजयः ॥ ५३ ॥

अंशुकान्ताश्च कासाञ्चिन् मुख मारुत कम्पिताः ।
उपर्युपरि वक्त्राणां व्याधूयन्ते पुनः पुनः ॥ ५४ ॥

ताः पताका इवोद्धूताः पत्नीनां रुचिर प्रभाः ।
नानावर्णः सुवर्णानां वक्त्र मूलेषु रेजिरे ॥ ५५ ॥

ववल्गुश् चात्र कासाञ्चित् कुण्डलानि शुभार्चिषाम् ।
मुखमारुतसंसर्गान्मन्दं मन्दं सुयोषिताम् ॥ ५६ ॥

शर्करासव गन्धैश्च प्रकृत्या सुरभिः सुखः ।
तासां वदन निःश्वासः सिषेवे रावणं तदा ॥ ५७ ॥

रावणानन शङ्काश्च काश्चिद् रावण योषितः ।
मुखानि स्म सपत्नीना मुपा जिघ्रन् पुनः पुनः ॥ ५८ ॥

अत्यर्थं सक्त मनसो रावणे ता वरस्त्रियः ।
अस्वतन्त्राः सपत्नीनां प्रियमे वाचरंस् तदा ॥ ५९ ॥

बाहू नुपनि धायान्याः पारिहार्य विभूषितान् ।
अंशुकानि च रम्याणि प्रमदास् तत्र शिश्यिरे ॥ ६० ॥

अन्या वक्षसि चान्यस्यास् तस्याः काश्चित् पुनर्भुजम् ।
अपरा त्वङ्क मन्यस्यास् तस्याश् चाप्यपरा भुजौ ॥ ६१ ॥

ऊरु पार्श्व कटी पृष्ठ मन्योन्यस्य समाश्रिताः ।
परस्पर निविष्टाङ्ग्यो मद स्नेह वशानुगाः ॥ ६२ ॥

अन्योन्य स्याङ्ग संस्पर्शात् प्रीयमाणाः सुमध्यमाः ।
एकीकृत भुजाः सर्वाः सुषुपुस् तत्र योषितः ॥ ६३ ॥

अन्योन्य भुज सूत्रेण स्त्रीमाला ग्रथिता हि सा ।
मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदा ॥ ६४ ॥

लतानां माधवे मासि फुल्लानां वायु सेवनात् ।
अन्योन्य माला ग्रथितं संसक्त कुसुमोच्चयम् ॥ ६५ ॥

व्यति वेष्टित सुस्कन्ध मन्योन्य भ्रमराकुलम् ।
आसीद्वन मिवोद्धूतं स्त्रीवनं रावणस्य तत् ॥ ६६ ॥

उचितेष्वपि सुव्यक्तं न तासां योषितां तदा ।
विवेकः शक्य आधातुं भूषणाङ्गाम्बर स्रजाम् ॥ ६७ ॥

रावणे सुख संविष्टे ताः स्त्रियो विविधप्रभाः ।
ज्वलन्तः काञ्चना दीपाः प्रैक्षन्ता निमिषा इव ॥ ६८ ॥

राजर्षि पितृ दैत्यानां गन्धर्वाणां च योषितः ।
राक्षसानां च याः कन्यास् तस्य कामवशं गताः ॥ ६९ ॥

युद्धकामेन ताः सर्वा रावणेन हृताः स्त्रियः ।
समदा मदनेनैव मोहिताः काश्चि दागताः ॥ ७० ॥

न तत्र काश्चित् प्रमदाः प्रसह्य
वीर्योप पन्नेन गुणेन लब्धाः ।
न चान्य कामापि न चान्य पूर्वा
विना वरार्हां जनकात्मजां ताम् ॥ ७१ ॥

न चा कुलीना न च हीन रूपा
ना दक्षिणा नानुपचार युक्ता ।
भार्याऽभवत् तस्य न हीन सत्त्वा
न चापि कान्तस्य न कामनीया ॥ ७२ ॥

बभूव बुद्धिस्तु हरीश्वरस्य
यदीदृशी राघव धर्म पत्नी ।
इमा यथा राक्षस राज भार्याः
सुजातमस्येति हि साधु बुद्धेः ॥ ७३ ॥

पुनश्च सोऽचिन्तय दार्तरूपो
ध्रुवं विशिष्टा गुणतो हि सीता ।
अथाय मस्यां कृतवान् महात्मा
लङ्केश्वरः कष्ट मनार्य कर्म ॥ ७४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे नवमः सर्गः
॥ ९ ॥